# M.A. 4th Semester Examination, 2021
# SANSKRIT
# Course ID: 40952
# Course Code: SNSK 402EA
# (Brāhmaṇa)

**Full Marks: 40** **Time: 2 Hours**

**The figures in the margin indicate full marks**

## Unit-I

(ऐतरेयब्राह्मणे प्रश्नाः)

**1. अधोलिखितेषु ब्राह्मणवाक्येषु द्वयोः व्याख्या कार्या ।** **5X2 =10**

(अ) तदाहुर्यदेकादशकपालः पुरोळाशो द्वावग्नाविष्णू कैनयोस्तत्र क्लृप्तिः, का विभक्तिरिति ॥

(आ) प्राजापत्यायतनाभिरेवाऽऽभी राध्नोति य एवं वेद।

(इ) मुष्टी कुरुते।

(ई) श्रीर्वै यशश्छन्दसां बृहती।

**2. निम्नलिखितेषु प्रश्नेषु पञ्चप्रश्नानाम् उत्तराणि लेख्यानि ।** **2X5 =10**

(अ) कृष्णाजिनस्य जरायुरूपत्वं प्रतिपाद्यताम्।

(आ) "आञ्जन्त्येनम्" इत्यस्य कोऽभिप्रायः?

(इ) आज्यघृतयोर्भेदः प्रतिपाद्यताम्।

(ई) वीर्यप्राप्त्यर्थं कस्य छन्दसः विधानमस्ति ? ?

(उ) पशुकामयजमानस्य किं कर्त्तव्यम् ?

(ऊ) सप्तदशसामधेनीमन्त्राणां क्रमः लिख्यताम्।

(ऋ) दीक्षणीयेष्टेः देवताः निरूप्यन्ताम्।

## Unit –II

(शतपथब्राह्मणे प्रश्नाः)

**3. निम्नलिखितेषु प्रश्नेषु एकस्य उत्तरं देयम्।**

(अ) शतपथब्राह्मणानुसारं वाजपेययागस्य स्वरूपम् आलोच्यताम्। 10

(आ) वाजपेयशब्दस्य कोऽर्थः ? वाजपेययागस्य फलं निरूप्य चतुस्त्रिंशत्सोमसुराग्रहाणां ग्रहणविधिः प्रतिपाद्यताम्। 1+3+6=10

(इ) किं नाम परिस्रुतम् ? सोमक्रयणविधिम् उल्लिख्य सप्तदशप्राजापत्यपशुग्रहणं निरूप्यताम् । 2+3+5=10

**4. निम्नलिखितेषु कयोश्चिद् द्वयोः सप्रसंगव्याख्या कार्या ।** **5X2 =10**

(अ) स बृहस्पतिः सवितारमेव प्रसवायोपाधावत् । सविता वै देवानां प्रसविता । इदं मे प्रसुव, त्वत्पर्सूत इदमुज्जयानीति । तद् अस्मै सविता प्रसविता प्रासुवत् । तत्सवितृप्रसूत उदजयत् । स इदं सर्वमभवत् ...... तेनेष्टैतामेवोर्ध्वो दिशमुदक्रामत् । तस्माद् यश्च वेद , यश्च न , एषोर्ध्वा बृहस्पतेर्दिगित्येवाहुः ॥

(आ) ग्रहा ऊर्जाहुतयो व्यन्तो विप्राय मतिम् । तेषां विशिप्रियाणां वोऽहमिषमूर्जं समग्रभम् – उपयामगृहीतोऽसि । इन्द्राय तेवा जुष्टं गृह्णामि, एष ते योनिः , इन्द्राय त्वा जुष्टतमम् । इति सादयति । ऊर्ग्वै रसः । रसमेवैतेनोज्जयति ॥

(इ) अथ पूर्वेद्युर्द्वौ खरौ कुर्वन्ति – पुरोऽक्षमेवान्यम् , पश्चादक्षमन्यम् । नेत्सोमग्रहांश्च सुराग्रहांश्च सह सादयामेति। तस्मात् पूर्वेद्युर्द्वौ खरौ कुर्वन्ति – पुरोऽक्षमेवान्यम् , पश्चादक्षमन्यम् ॥